श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीतं

# ॥ श्री लक्ष्मीनृसिंहकरावलम्बस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनृसिंहकरावलम्बस्तोत्रम् ॥

तुष्ट्यै सदा भगवतश्चरणारविन्द -
    द्वंद्वावलम्बविभवं तव मेऽद्य देहि।
स्तुत्यै मुकुन्द सुगुणार्णवसर्वभोग्य
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम् ॥ 1 ॥

श्रीतापनीयविदितात्ममहाप्रभाव
    लक्ष्मीसमेत चतुराननरुद्रमुख्यैः।
संसेव्यमानचरणाम्बुज भक्तभोग्य
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम् ॥ 2 ॥

यद्वत्स साधु पठितं कथयेति पुत्रं
    पृच्छत्यहो पितरि नामगुणानुवादः।
विष्णोरिति प्रतिवदन्तमपालयस्त्वं
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम् ॥ 3 ॥

संदीपिताग्निविनिपातितदैत्यडिम्भ -
    संरक्षणाय विनिवर्तितवह्निशक्ते।
भक्ताय दारुपरिकल्पितपद्मतल्प
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम् ॥ 4 ॥

प्रह्लादनाशपरिचोदितसर्पजात -
    चूडामणिप्रवरदन्तविनाशहेतो।
स्मृत्या तवैव न विवेद तनुं सुभक्तः
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम् ॥ 5 ॥

सूतादिदत्तविषपानसमानकाल -
नामामृतेन परिपालितदैत्यपुत्र।
प्रह्लाददेहपरिरक्षणजागरूक
लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ 6॥

संरुष्टदैत्यपतिचोदितदिग्गजादि -
दन्तादिनाशपरितोषितभक्तडिम्भ।
भक्ताभिपालनविचित्रविशेषदीक्ष
लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ 7॥

शैलाग्रभागपतमानहिरण्यडिम्भ -
संरक्षणाय मृदुभूतधराधिनाथ।
दैत्येन्द्रपुत्रहृदयासनमङ्गळाङ्ग
लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ 8॥

विष्णुप्रभावपरिकीर्तनबद्धवैर -
दैत्येन्द्रबद्धशिशुबन्धनमोक्षहेतो।
क्षिप्तोऽर्णवे तटमगात् कृपया तवैव
लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ 9॥

सर्वेष्वसौ वसति सर्वशरीरविष्णुः
पृष्टस्त्वया विदित एव पुराप्यनन्तः।
इत्युक्तवन्तमसुरात् परिरक्षसि स्म
लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ 10॥

भक्तस्य दानवशिशोर्वचनञ्च सत्यं
कर्तुं तदा मुनिगणस्य समक्षमेव।
स्तम्भावतीर्ण दितिपुत्रविनाशकारिन्
लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ 11॥

सन्दीपिताग्निपरिवेष्टितकाष्ठमध्यं
    संप्रापितां यतितनुं त्वयसापि बद्धाम्।
संरक्षसि स्म शरणागतशङ्करस्त्वं
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ **12** ॥

उत्तारणं कलियुगे त्विति तापनीय -
    श्रुत्युक्त एव गरुडाद्रिबिले नृसिंह।
आविर्बभूविथ जगद्धरणाय यस्त्वं
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ **13** ॥

काले कलौ तु जगतां परिपालनाय
    स्वाराधकान् यतिवरान् परिगृह्य भक्तान्।
ग्रामेषु सञ्चरसि भक्तिपराशयज्ञैः
    लक्ष्मीनृसिंह ! मम देहि करावलम्बम्॥ **14** ॥

शन्नो भवत्विति नृसिंहकरावलम्ब -
    स्तोत्रञ्चकार निगमान्तगुरुर्यतीन्द्रः।
सर्वस्य पुत्रधनधान्यसमृद्धिसिद्ध्यै
    दद्याद् रमानरहरिस्स्वकरावलम्बम्॥ **15** ॥

॥ इति श्री लक्ष्मीनृसिंहकरावलम्बस्तोत्रं समाप्तम्॥